**SANSKRIT**

**दिनाङ्क : 01/01/2025 सायम 06:20**

**<u>आदौ मुख्यवार्ताः</u>**

· केन्द्रीय-मन्त्रिमण्डलेन डाई अमोनियम फॉस्फेट-डीएपी इति उर्वरकेषु पोषक-तत्त्वाधारितम् अर्थ-साहाय्यं समेध्य सार्ध-त्रिसहस्र-रूप्यकाणि प्रति मीट्रिक-टन-भार-परिमितं कृतम्।

· केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्री शस्य आगोप-योजनायाः अर्थात् फसल बीमा योजना अथ पुनर्घटित ऋतु आधारितां शस्य आगोप-योजनायाः च अनवरतं प्रवर्तनं निर्णीतम्।

· प्रशासनेन अद्यारभ्य **वन नेशन वन सब्सक्रिप्शन**-ओ.एन.ओ.एस. इति एकं राष्ट्रम् एका सदस्यता इति योजनायाः शुभारम्भो विहितः।

· भारत-पाकिस्तानयो: मध्ये अद्य कारागारेषु स्थितानाम् बद्ध-नागरिकाणां मत्स्य जीविनाम् अथ च परामाणु प्रतिष्ठान सैविध्यानां च सूचे: आदान-प्रदानं जातम्।

· हॉकी इण्डिया-लीग इति स्पर्धामालिकायाम् अद्य सायम् ओडिशायाः राउरकेलायाम् श्राची राढ़ बंगाल टाइगर्स इति दलं गोनासिका दलेन सह स्पर्धिष्यते।

**मन्त्रिमण्डलनिर्णयः**

केन्द्रीय-मन्त्रिमण्डलेन डाई अमोनियम फॉस्फेट-डीएपी इति उर्वरकेषु पोषक-तत्त्वाधारितम् अर्थ-साहाय्यं समेध्य सार्ध-त्रिसहस्र-रूप्यकाणि प्रति मीट्रिक-टन-भार-परिमितं कृतम्। अनेन कृषकेभ्यः समुचित-मूल्ये डीएपी इति उपलब्धता सुनिश्चिता-भविष्यति। सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवोचत् यत् अस्यान्तर्गतम् यत् अतिरिक्त-भारं भविष्यति केन्द्र-प्रशासनं तत् प्रदास्यति। **

केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्री शस्य आगोप-योजनायाः अर्थात् फसल बीमा योजना अथ पुनर्घटित ऋतु आधारितां शस्य आगोप-योजनायाः च अनवरतं प्रवर्तनं निर्णीतम्। मन्त्रिमण्डलोपवेशनानन्तरं वार्ताहरान् सम्बोधयता सूचना-प्रसारण-मन्त्रिणा अश्विनी वैष्णव वर्येण प्रोक्तं यत् एतदर्थम् आबण्टित-राशिः समेध्य सार्ध-नवषष्टि-सहस्राधिक-पञ्चदश-कोटि-रूप्यकाणि विहितः। तेन प्रोक्तं यत् अस्याः योजनायाः अन्तर्गतं आगोपितेषु कृषकेषु प्रतिशतम् अष्टाशीतिः लघवः सीमान्त-कृषकाः च सन्ति। अथ च प्रतिशतं सप्तपञ्चाशन्मिताः कृषकाः अन्य-पश्चवर्ति-वर्गात् अनुसूचित-जातिवर्गात् अनुसूचित-जनजातिवर्गात् वर्तन्ते। श्री-वैष्णवः अवोचत् यत् विगतेषु अष्ट-वर्षेषु कृषकेभ्यः आगोपयोजनायाः अन्तर्गतं सप्तति-सहस्राधिकैक-लक्षकोटि-रूप्यकाणि आबण्टितानि। तेनेदमपि उक्तं यत् अस्मिन् नववर्षे मन्त्रिमण्डलस्य प्रथमोपवेशनं कृषकेभ्यः समर्पितम् अस्ति।

**प्रशासनम □एकं राष्ट्रम □**

प्रशासनेन अद्यारभ्य **वन नेशन वन सब्सक्रिप्शन**-ओ.एन.ओ.एस. इति एकं राष्ट्रम् एका सदस्यता इति योजनायाः शुभारम्भो विहितः। अस्याः योजनायाः उद्देश्यं विद्यार्थिभ्यः **सिंगल सब्सक्रिप्शन प्लेटफार्म** अर्थात् एकल-सदस्यता ग्रहणस्य अन्तर्गतं शोधपत्राणि पत्रिकाः शैक्षिक-सामग्री च समेत्य व्यापकं डिजिटल इति अन्तर्जाल-निहितानां ज्ञानस्य संसाधनानां निर्बाधोपलब्धता वर्तते। अस्याः योजनायाः पृथक्-पृथक् स्थलेषु सदस्यता ग्रहणस्य आवश्यकता न भविष्यति। अथ च ज्ञानं सर्वेभ्यः सुलभं भविष्यति। विश्वविद्यालयानां भारतीय-प्रौद्योगिकी-संस्थानानां प्राशासनिक-साहाय्य-प्राप्तवताम् उच्च-शिक्षा-संस्थानानाम् च अशीति-लक्षाधिकैक-कोटि-विद्यार्थिनः अनया योजनया जगतः शीर्ष-शोधपत्रिकासु प्रकाशितानि शोध- पत्राणि द्रष्टुं सौविध्यं प्राप्स्यन्ति।

**बाइट - अश्विनी वैष्णव- 29 सै.**

अवधेयं यत् केन्द्रीय-मन्त्रिमण्डलेन गतवर्षे नवम्बर-मासस्य पञ्चविंशे दिने वन नेशन, वन सब्सक्रिप्शन इति एकं राष्ट्रम् एका सदस्यता इति योजना स्वीकृतासीत्। अस्याः योजनायाः प्रथमे चरणे विविध-विषय-सम्बद्धानि चतुश्शतोत्तर-त्रयोदश-सहस्राणि अन्ताराष्ट्रिय-पत्राणि च सम्मिलितानि सन्ति।

**भारत-पाकिस्तान**

भारत-पाकिस्तानयो: मध्ये अद्य कारागारेषु स्थितानाम् बद्ध-नागरिकाणां मत्स्य जीविनाम् अथ च परामाणु प्रतिष्ठान सैविध्यानां च सूचे: आदान-प्रदानं जातम्।

**राष्ट्रपति-उपराष्ट्रपति - नववर्ष**

राष्ट्रपति: द्रौपदी मुर्मू:, उपराष्ट्रपति: जगदीप धनखड़:, प्रधानमन्त्री नरेन्द्र मोदी च अद्य नववर्षस्य अवसरे जनेभ्यः अभिवादनं कृतवन्तः। जनसम्पर्कमाध्यमेन राष्ट्रपतिः मुर्मूः नागरिकाणाम् उज्ज्वलभविष्यस्य निर्माणार्थं मिलित्वा कार्यं कर्तुं स्वस्य प्रतिबद्धतां उक्तवती।

उपराष्ट्रपति धनखड़ः नववर्षं देशस्य गणतन्त्रयात्रायां महत्त्वपूर्ण: पदक्षेप: इति वर्णितवान्। नववर्षे नागरिकाणाम् उत्तमस्वास्थ्यस्य समृद्धेः च काममानः प्रधानमन्त्री मोदी आशां प्रकटितवान् यत् अस्मिन् वर्षे सर्वेषां जीवने नूतनावकाशाः, सफलताः, अनन्तसुखं च आनेष्यति।

**<u>रक्षामन्त्रालय-राजनाथ सिंह:</u>**

रक्षामन्त्रालयेन युद्धनीती: प्राविधिक- प्रगतिं च वर्धापयितुं पञ्चविंशत्युत्तर द्विसहस्रम् वर्षं परिष्कार- वर्षं घोषितम्। रक्षामन्त्रालयेन रक्षाक्षेत्रे वर्तमानान् भाविन: च परिष्कारान् प्रोत्साहयितुं पञ्चविंशत्युत्तर द्विसहस्रम् वर्षं परिष्काराणाम् वर्षं घोषितम्। रक्षामन्त्री राजनाथसिंह: गतदिने रक्षामन्त्रालयस्य सर्वैः सचिवैः सह महत्त्वपूर्णमुपवेशनं कृतवान्। अस्मिन् उपवेशने रक्षाक्षेत्रस्य प्रमुखयोजनानां, परियोजनानां, परिष्काराणाम् च प्रगतेः समीक्षा कृता।

श्रीसिंहः विश्वासं प्रकटितवान् यत् परिष्काराणाम् वर्षम् सशस्त्रबलानाम् आधुनिकीकरणस्य यात्रायां महत्त्वपूर्ण: पदक्षेपः भविता। एतत् लक्ष्यं प्राप्तुं अनेकानि क्षेत्राणि अभिज्ञातानि यत्र पञ्चविंशत्युत्तर द्विसहस्रवर्षे मुख्यतया ध्यास्यन्ते।

**<u>नववर्ष - समारोह</u>**

पञ्चविंशत्युत्तर द्विसहस्रतमस्य वर्षस्य नववर्षस्य स्वागतं सम्पूर्णे विश्वस्मिन् महता हर्षेण भव्यतया च सह आमान्यते। विश्वस्मिन् उल्लासेन, उत्साहेन, अग्निक्रीडनकैः, सांस्कृतिककार्यक्रमैः, सुखेन च सह नववर्षस्य स्वागतं कृतम्। सर्वप्रथमं प्रशान्तक्षेत्रस्य किरीबत्यां नववर्षस्य स्वागतं कृतम्। नववर्षस्य स्वागतसमारोहः अमेरिकाया: समोआयां अन्त्ये अभवत्। सिड्नीतः लंदन पर्यन्तं नूतनवर्षं आशाभिः आकांक्षाभिः च सह आचरितम्।

नववर्षस्य स्वागतार्थं दुबईयां विश्वस्य सर्वोच्चगगनस्पर्शिनि भवने बुर्जखलीफा-इत्यत्र भव्यानि अग्नि-क्रीडनकानि च प्रज्वलितानि। लण्दन्-नगरस्य अतिशीतस्य मध्ये टेम्स्-नद्याः तटे अद्भुतै: अग्निक्रीड़नकैः सह नववर्षम् आमानितम्। अमेरिका, कनाडा, ब्राजील्, अर्जेन्टिना, बर्मुडा देशेषु नववर्षस्य उत्सवः आरब्धः।

भारतं पारम्परिकहर्षेण धार्मिकभावेन च सह नववर्षस्य स्वागतं करोति। राजधानी-दिल्लीनगरस्य बिरलामन्दिरे, झण्डेवालान् इत्यादिषु विविधमन्दिरेषु प्रातः आरार्तिक्ये भागं ग्रहीतुं देवदेवतानां आशीर्वादं प्राप्तुं च जनाः समुपस्थिताः सन्ति। मुम्बईनगरस्य प्रशासनेन नववर्षस्य उत्सवस्य सर्वाणि आवश्यकानि सज्जानि-विहितानि। मरीनड्राइव्, जुहुबीच्, गेटवे आफ् इण्डिया इत्यादिषु विविधस्थानेषु जनानां विशालजनसमूहः दृष्टः। अस्मिन् अवसरे विदेशेभ्यः च बहवः भक्ताः अमृतसरनगरस्य श्रीहरमिन्दरसाहबं गत्वा स्वस्य राष्ट्रस्य च समृद्ध्यर्थं प्रार्थनां कृतवन्तः। केरलराज्ये नृत्येन, संगीतेन, अग्निक्रीडनकैः च सह नववर्षम् आचरितम् ।

**<u>हॉकी क्रीडा</u>**

हॉकी इण्डिया-लीग इति स्पर्धामालिकायाम् अद्य सायम् ओडिशायाः राउरकेलायाम् श्राची राढ़ बंगाल टाइगर्स इति दलं गोनासिका दलेन सह स्पर्धिष्यते। हैदराबाद तूफ़ान इत्यनेन दलेन गतदिने डेल्ही SG पाइपर्स इति दलं शूट-आउट माध्यमेन पञ्च-चत्वारि अङ्कान्तरालेन पराजित्य अतिरिक्तम् अङ्कम् अधिगतम्।

**इति वार्ता।**